संस्कृत

प्रयोग

क्र. १७

आराधन प्रयोग

कै

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशाय नमः ॥ अथ आराधनप्रयोगः ॥ गुरुचतुष्टयस्य केशवादीनां च प्रत्येकमेकैक इत्येवं षोडश ब्रा-
ह्मणपक्षे अभिप्रेत्योच्यते ॥ प्रातर्होमोत्तरं ब्रह्मीभूतस्य गुरोः समाराधने गुर्वर्थे भवद्भिः क्षणः कर्तव्यः ॥
एवं परमगुर्वर्थे क्षणः ॥ परमेष्ठीगुर्वर्थे ० परात्परगुर्वर्थे ० यद्वा विश्वरूपधराचार्यार्थे ० ततो गुरुत्रयमि-
ति वा [illegible] चत्वारो ब्राह्मणान्निमन्त्र्य ॥ शुक्लपक्षे केशवार्थे क्षण ० १२ ॥ कृष्णपक्षे संकर्षणार्थे भव-
द्भिः क्षणः ॥ १२ ॥ इत्येवं द्वादश ब्राह्मणान्निमंत्र्य मध्याह्ने ब्राह्मणानाहूय कृतशुचिराचम्य [illegible]
पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं ब्रह्मीभूतस्य गुरोः आराधनं
करिष्ये ॥ गंधाक्षततुलसीकर्पूरमिश्रजलेन वरणक्रमेण तेषां पादप्रक्षालनोदकं पात्रांतरे गृ-
हीत्वा तत्पादौ साक्षतगंधपुष्पतुलसीदलैरभ्यर्च्य ॥ आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं

नज्ञबोधरूपं ॥ योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ इति नमस्कुर्यात् ॥ एवं सर्वेषां गु-
रूणां गंधादिभिस्तास्तान्नमस्कृत्य देयसंनिधौ संस्थाप्य कुशासनेषु प्राङ्मुखान्नुदङ्मुखान्वा उपवेश्य
पुरुषसूक्तेन प्रत्यृचं ओं नमो नारायणायेति मंत्रसहितेनादि षोडशोपचारैः पदार्थानुसमयेन
अभ्यर्च्ययेत् ॥ यद्वा पंचोपचारैः पूजा द्रष्टव्या ॥ ततः सर्वेषु पात्रेषु पायसादिविशिष्ट द्रव्यं सं-
ड्यंग्यं जनसहितं च परिविष्य ॥ गायत्र्याभ्युक्ष्य ॥ गुरवे इदमन्नं परिवेक्ष्यमाणं चान्नमेस्या
ह व्यं न मम ॥ एवं सर्वत्रान्नत्यागं कृत्वा ॥ ओं तत्ब्रह्म ॥ ओं तद्वायुः ॥ ओं तदात्मा ॥ ओं तत्स-
त्यं ॥ ओं तत्पुरोर्नमः ॥ अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमिं-
द्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं ब्रह्मा त्वं प्रजापतिः ॥ त्वं तदाप आपोज्योती रसोमृतं ब्रह्म भूर्भु-



" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

ःस्कृवरो॥ ब्रह्मार्पणमित्यादिजपित्वा॥ भोजने पूपविष्टेषु उपनिषदमंत्रान्श्रावयेत॥ तृप्तेषु ओं तद्ब्रह्मेत्यनुवा
कं जपित्वा उत्तरापोशनो नरमाचांतेषु उपविष्टेषु विशिष्टतांबूल दक्षिणावस्त्रादिभिरभ्यर्च्य उपविष्टेष्वेव
तेषु गुर्वाराधनांगभूतं तीर्थपूजनमहं करिष्ये इति संकल्प्य॥ चतुरस्रं मंडलं गोमयेनोपलिप्य तत्र रंगवल्या
दिभिरलंकृत्य तन्मंडले धान्योपरि पादोदककलशं संस्थाप्य तत्र गंगादिसर्वतीर्थानि भावयित्वा पूरुषसू
क्तेन अत्युत्तमं तीर्थराजायनमः इत्यंते षोडशोपचारैः समभ्यर्च्य तत्त्वा त्रिः शिरसि धृत्वा॥ लोकःसर त्यत्यायां त्वे
ष वै देवयानः पंथास्त मेवान्यारोहंत्याक्रोशं तो ... वर्तिमे वान्यस्मि प्रतिष्ठ्य प्रतिष्ठां गच्छंति यदा द
शशतं कुर्वंत्यथैकमुत्थानं शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठंति यदा शतं सहस्रं
कुर्वंत्यथैकमुत्थानं सहस्रसंमितो वा असौ लोकोमुमेव लोकमभिजयंति यदेषां प्रमीयेत यदा वा
जीर्येदथैकमुत्थानं तद्धि तीर्थं॥ इत्यनुवाकशेषं॥ ॥ श्री यास्माद्धातः पवते॥ श्री यो देति सूर्य

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

स एको बृहस्पतेरानंदः ॥ श्रो० ॥ ते ये शतं बृहस्पतेरानंदाः ॥ स एको ब्रह्मण आनंदः श्रो० ॥ स यश्चायं पुरुषे-
यश्चासावादित्ये ॥ स एकः स य एवंवित् ॥ अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमात्मानमुपसंक्रामति ।
एतं प्राणमयमात्मानमुपसंक्रामति ॥ एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमा-
त्मानमुपसंक्रामति ॥ एतमानंदमयमात्मानमुपसंक्रामति ॥ तदप्येष श्लोको भवति ॥ अनुवाकं
जपित्वा ॥ हरिकीर्तनपुरःसरं हर्षनृत्यं कृत्वा तत्पात्रं पुनर्मंडले संस्थाप्य चंदनाक्षतपुष्पाणि प्र-
जातिष्ठानि बंधुभिः सह स्वयं धृत्वा विप्रान्प्रदक्षिणीकृत्य ॥ आनंदमानंदकरं० गुरुर्ब्रह्मा गुरु०
इत्यादिमंत्रैर्द्विजांतीर्थराजं च नमस्कृत्य गुर्वर्थं विप्रहस्ते पादोदकपात्रं दत्वा तदाज्ञया तत्तीर्थमं-
त्रेण गृह्णीयात् ॥ तत्र मंत्रः ॥ अविद्यामूलशमनं सर्वपापप्रणाशनं ॥ श्रीगुरोः पादोदकं त्वि-
त्संसारद्रुमनाशनं ॥ पुत्रादिकामः ॥ शोषणं पापपंकस्य दीपनं ज्ञानतेजसः ॥ गुरुपादोद

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

भीषोदेति सूर्यः। भीषास्मादग्निश्चेंद्रश्च।।मृत्युर्धावतिपंचमइति।।सैषानंदस्यमीमांसाभवति।।युवास्यात्साधुयुवाध्या
यकः।।आशिष्ठोदृढिष्ठोबलिष्ठः।।तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात्।।सएकोमानुषआनंदः।
तेयेशतंमानुषाआनंदाः।।सएकोमनुष्यगंधर्वाणामानंदः।।श्रोत्रियस्यचाकामहतस्य।।तेयेश
तंमनुष्यगंधर्वाणामानंदाः।।सएकोदेवगंधर्वाणामानंदः।।श्रोत्रियस्यचाकामहतस्य।।तेयेश
तंदेवगंधर्वाणामानंदाः।।सएकःपितृणांचिरलोकलोकानामानंदः।।श्रोत्रियस्यचाकामह
तस्य।।तेयेशतंपितृणांचिरलोकलोकानामानंदाः।।सएकआजानजानांदेवानामानंदः।।श्रो
त्रियस्यचाकामहतस्य।।तेयेशतमाजानजानांदेवानामानंदाः।।सएकःकर्मदेवानांदेवानामा
नंदः।।येकर्मणादेवानपियंति।।श्रोत्रि०।।तेयेशतंकर्मदेवानांदेवानामानंदाः।।सएकोदेवाना
मानंदः।।श्रो०।।तेयेशतंदेवानामानंदाः।।सएकइंद्रस्यानंदः।।श्रो०।।तेयेशतमिंद्रस्यानंदाः।। २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

।चिरं पुत्रपौत्रप्रवर्धनं इति गृण्हियात्॥ तान् पुनः प्रणम्य तानन्यांश्च दक्षिणाभिस्तोषयित्वा
तन्मानपुरःसरं ताननुव्रज्य कर्मेश्वरार्पणं कृत्वास्वहृद्युतो भुंजीतेति ततः प्राप्त द्वादशमहालय
तीर्थप्रयुक्तादिश्राद्धानि कुर्यात्॥ प्रतिमासमेव आराधनं प्रत्यब्दं पार्वणोत्तरं चाराधनं चैव
मेव इत्थं करणाच्छास्त्रोक्तयथाशक्तियतीन् यथाशक्ति ब्राह्मणानां रूप्य पादप्रक्षालनपूर्वकं
गंधादिभिरभ्यर्च्य। तोषयेदिति। अ... पुपनाम्ना विठ्ठलस्य नारायणेन संपादितं
पांचवेयांचास्त असे शाके १७५२

(५)

३

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com